# Agni Stuti

# અગ્નિસ્તુતિઃ ૩

## Document Information

Text title : Agni Stuti

File name : agnistutiH3.itx

Category : deities_misc, mahAbhArata, stuti

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | Adiparva | adhyAya 223/7-19 (kumbhakoNaM 228)||

Latest update : October 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 18, 2025

*sanskritdocuments.org*

# અગ્નિસ્તુતિઃ ૩

જરિતારિરુવાચ ।
આત્માસિ વાયોઃ પવનઃ શરીરમુત વીરુધામ્ ।
યોનિરાપશ્ચ તે શુક્ર યોનિસ્ત્વમસિ ચામ્ભસઃ ॥ ૭॥

ઊર્ધ્વં ચાધશ્ચ ગચ્છન્તિ વિસર્પન્તિ ચ પાર્શ્વતઃ ।
અર્ચિષસ્તે મહાવીર્ય રશ્મયઃ સવિતુર્યથા ॥ ૮॥

સારિસૃક્વ ઉવાચ ।
માતા પ્રપન્ના પિતરં ન વિદ્મઃ પક્ષાશ્ચ નો ન પ્રજાતાબ્જકેતો ।
ન નસ્ત્રાતા વિદ્યતેઽગ્ને ત્વદન્યસ્તસ્માદ્ધિ નઃ પરિરક્ષૈકવીર ॥ ૯॥

યદગ્ને તે શિવં રૂપં યે ચ તે સપ્ત હેતયઃ ।
તેન નઃ પરિરક્ષાદ્ય ઈડિતઃ શરણૈષિણઃ ॥ ૧૦॥

ત્વમેવૈકસ્તપસે જાતવેદો નાન્યસ્તપ્તા વિદ્યતે ગોષુ દેવ ।
ઋષીનસ્માન્બાલકાન્પાલયસ્વ પરેણાસ્માન્પ્રૈહિ વૈ હવ્યવાહ ॥ ૧૧॥

સ્તમ્બમિત્ર ઉવાચ ।
સર્વમગ્ને ત્વમેવૈકસ્ત્વયિ સર્વમિદં જગત્ ।
ત્વં ધારયસિ ભૂતાનિ ભુવનં ત્વં બિભર્ષિ ચ ॥ ૧૨॥

ત્વમગ્નિર્હવ્યવાહસ્ત્વં ત્વમેવ પરમં હવિઃ ।
મનીષિણસ્ત્વાં યજન્તે બહુધા ચૈકધૈવ ચ ॥ ૧૩॥

સૃષ્ટ્વા લોકાંસ્ત્રીનિમાન્હવ્યવાહ પ્રાપ્તે કાલે પચસિ પુનઃ સમિદ્ધઃ ।
સર્વસ્યાસ્ય ભુવનસ્ય પ્રસૂતિસ્ત્વમેવાગ્ને ભવસિ પુનઃ પ્રતિષ્ઠા ॥ ૧૪॥

ત્વમન્નં પ્રાણિનાં ભુક્તમન્તર્ભૂતો જગત્પતે ।
નિત્યં પ્રવૃદ્ધઃ પચસિ ત્વયિ સર્વં પ્રતિષ્ઠિતમ્ ॥ ૧૫॥

દ્રોણ ઉવાચ ।

સૂર્યો ભૂત્વા રશ્મિભિર્જાતવેદો ભૂમેરમ્ભો ભૂમિજાતાન્ રસાંશ્ચ ।
વિશ્વાનાદાય પુનરુત્સર્ગકાલે સૃષ્ટ્વા વૃષ્ટ્યા ભાવયસીહ શુક્ર ॥ ૧૬॥

ત્વત્ત એતાઃ પુનઃ શુક્ર વીરુધો હરિતચ્છદાઃ ।
જાયન્તે પુષ્કરિણ્યશ્ચ સમુદ્રશ્ચ મહોદધિઃ ॥ ૧૭॥

ઇદં વૈ સદ્મ તિગ્માંશો વરુણસ્ય પરાયણમ્ ।
શિવસ્ત્રાતા ભવાસ્માકં માસ્માનદ્ય વિનાશય ॥ ૧૮॥

પિઙ્ગાક્ષ લોહિતગ્રીવ કૃષ્ણવર્ત્મન્હુતાશન ।
પરેણ પ્રૈહિ મુઞ્ચાસ્માન્સાગરસ્ય ગૃહાનિવ ॥ ૧૯॥

ઇતિ મહાભારતે આદિપર્વણિ ૨૨૩ અધ્યાયાન્તર્ગતા અગ્નિસ્તુતિઃ સમ્પૂર્ણા ।

મહાભારત । આદિપર્વ । અધ્યાય ૨૨૩/૭-૧૯ (કુમ્ભકોણં ૨૨૮)॥

mahAbhArata . Adiparva . adhyAya 223/7-19 (kumbhakoNaM 228)..

Proofread by PSA Easwaran

*Agni Stuti*

pdf was typeset on October 18, 2025

Please send corrections to *sanskrit@cheerful.com*